# श्रीमद् भागवत रसिक कुटुंब

## श्रीगोपालसहस्रनामस्तोत्रम्

**पार्वत्युवाच**

**कैलासशिखरे रम्ये, गौरी पृच्छति शङ्करम् ।**
**ब्रह्माण्डाखिलनाथस्त्वं(म्), सृष्टिसं(म्)हारकारकः ॥ 1॥**

**त्वमेव पूज्यसे लोकैर्- ब्रह्मविष्णुसुरादिभिः ।**
**नित्यं(म्) पठसि देवेश, कस्य स्तोत्रं(म्) महेश्वर ॥ 2॥**

**आश्चर्यमिदमत्यन्तं(ञ्), जायते मम शङ्कर ।**
**तत्प्राणेश महाप्राज्ञ, सं(म्)शयं(ञ्) छिन्धि शं(ङ्)कर ॥ 3॥**

**श्रीमहादेव उवाच**

**धन्यासि कृतपुण्यासि, पार्वति प्राणवल्लभे ।**
**रहस्यातिरहस्यं(ञ्) च, यत्पृच्छसि वरानने ॥ 4॥**

**स्त्रीस्वभावान्महादेवि, पुनस्त्वं(म्) परिपृच्छसि ।**
**गोपनीयं(ङ्) गोपनीयं(ङ्), गोपनीयं(म्) प्रयत्नतः ॥ 5॥**

**दत्ते च सिद्धिहानिः(स्) स्यात्- तस्माद्यत्नेन गोपयेत् ।**
**इदं(म्) रहस्यं(म्) परमं(म्), पुरुषार्थप्रदायकम् ॥ 6॥**

धनरत्नौघमाणिक्य- तुरङ्गमगजादिकम् ।
ददाति स्मरणादेव, महामोक्षप्रदायकम् ॥ 7॥

तत्तेऽहं(म्) सम्प्रवक्ष्यामि, शृणुष्वावहिता प्रिये ।
योऽसौ निरञ्जनो देवश्- चित्स्वरूपी जनार्दनः ॥ 8॥

सं(म्)सारसागरोत्तार- कारणाय सदा नृणाम् ।
श्रीरङ्गादिकरूपेण, त्रैलोक्यं(वँ) व्याप्य तिष्ठति ॥ 9॥

ततो लोका महामूढा, विष्णुभक्तिविवर्जिताः ।
निश्चयं(न्) नाधिगच्छन्ति, पुनर्नारायणो हरिः ॥ 10॥

निरञ्जनो निराकारो, भक्तानां(म्) प्रीतिकामदः ।
वृन्दावनविहाराय, गोपालं(म्) रूपमुद्वहन् ॥ 11॥

मुरलीवादनाधारी, राधायै प्रीतिमावहन् ।
अं(म्)शां(म्)शेभ्यः(स्) समुन्मील्य, पूर्णरूपकलायुतः ॥ 12॥

श्रीकृष्णचन्द्रो भगवान् - नन्दगोपवरोद्यतः ।
धरणीरूपिणी माता,  यशोदानन्ददायिनी। ॥ 13॥

द्वाभ्यां(म्) प्रयाचितो नाथो, देवक्यां(वँ) वसुदेवतः ।
ब्रह्मणाऽभ्यर्थितो देवो, देवैरपि सुरेश्वरि ॥ 14॥

जातोऽवन्यां(म्) मुकुन्दोऽपि, मुरलीवेदरेचिका ।
तया सार्द्धं(वँ) वचः(ख्) कृत्वा, ततो जातो महीतले ॥ 15॥

सं(म्)सारसारसर्वस्वं(म्), श्यामलं(म्) महदुज्ज्वलम् ।
एतज्ज्योतिरहं(वँ) वेद्यं(ञ्), चिन्तयामि सनातनम् ॥ 16॥

गौरतेजो विना यस्तु, श्यामतेजः(स्) समर्चयेत् ।
जपेद्वा ध्यायते वापि, स भवेत्पातकी शिवे ॥ 17॥

स ब्रह्महा सुरापी च, स्वर्णस्तेयी च पञ्चमः ।
एतैर्दोषैर्विलिप्येत, तेजोभेदान्महेश्वरि ॥ 18॥

तस्माज्ज्योतिरभूद् द्वेधा, राधामाधवरूपकम् ।
तस्मादिदं(म्) महादेवि, गोपालेनैव भाषितम् ॥ 19॥

दुर्वाससो मुनेर्मोहे, कार्तिक्यां(म्) रासमण्डले ।
ततः(फ्) पृष्टवती राधा, सन्देहं(म्) भेदमात्मनः ॥ 20॥

निरञ्जनात्समुत्पन्नं(म्), मयाधीतं(ञ्) जगन्मयि ।
श्रीकृष्णेन ततः(फ्) प्रोक्तं(म्), राधायै नारदाय च ॥ 21॥

ततो नारदतः(स्) सर्वं(वँ), विरला वैष्णवास्तथा।
कलौ जानन्ति देवेशि, गोपनीयं(म्) प्रयत्नतः ॥ 22॥

शठाय कृपणायाथ, दाम्भिकाय सुरेश्वरि ।
ब्रह्महत्यामवाप्नोति, तस्माद्यत्नेन गोपयेत् ॥ 23॥

विनियोगः

ॐ अस्य श्रीगोपालसहस्रनामस्तोत्रमहामन्त्रस्य श्रीनारद ऋषिः ।

अनुष्टुप् छन्दः । श्रीगोपालो देवता । कामो बीजम् । माया शक्तिः ।
चन्द्रः कीलकम् श्रीकृष्णचन्द्र भक्तिरूपफलप्राप्तये
श्रीगोपालसहस्रनामजपे विनियोगः ।

## अथ ध्यानम्

कस्तूरीतिलकं(लँ) ललाटपटले वक्षः(स्)स्थले कौस्तुभं(न्),
नासाग्रे वरमौक्तिकं(ङ्) करतले वेणुः(ख्) करे कङ्कणम् ॥
सर्वाङ्गे हरिचन्दनं(म्) सुललितं(ङ्) कण्ठे च मुक्तावली,
गोपस्त्रीपरिवेष्टितो विजयते गोपालचूड़ामणिः ॥ 1॥

फुल्लेन्दीवरकान्तिमिन्दुवदनं(म्) बर्हावतं(म्)सप्रियं(म्),
श्रीवत्साङ्कमुदारकौस्तुभधरं(म्) पीताम्बरं(म्) सुन्दरम् ॥
गोपीनां(न्) नयनोत्पलार्चिततनुं(ङ्) गोगोपसङ्घावृतं(ङ्),
गोविन्दं(ङ्) कलवेणुवादनपरं(न्) दिव्याङ्गभूषं(म्) भजे ॥ 2॥

## ॥अथ श्रीगोपालसहस्रनामस्तोत्रम्॥

ॐ क्लीं(न्) देवः(ख्) कामदेवः(ख्) कामबीजशिरोमणिः ।
श्रीगोपालो महीपालः(स्), सर्ववेदां(ङ्)गपारगः ॥ 1॥

धरणीपालको धन्यः(फ्), पुण्डरीकः(स्) सनातनः ।
गोपतिर्भूपतिः(श्) शास्ता, प्रहर्ता विश्वतोमुखः ॥ 2॥

आदिकर्ता महाकर्ता, महाकालः(फ्) प्रतापवान् ।
जगज्जीवो जगद्धाता, जगद्भर्ता जगद्वसुः ॥ 3॥

मत्स्यो भीमः(ख्) कुहूभर्ता, हर्ता वाराहमूर्तिमान् ।

नारायणो हृषीकेशो, गोविन्दो गरुडध्वजः ॥ 4॥

गोकुलेन्द्रो महाचन्द्रः(श्), शर्वरीप्रियकारकः ।
कमलामुखलोलाक्षः(फ्), पुण्डरीकशुभावहः ॥ 5॥

दुर्वासाः(ख्) कपिलो भौमः(स्), सिन्धुसागरसङ्गमः ।
गोविन्दो गोपतिर्गोत्रः(ख्), कालिन्दीप्रेमपूरकः ॥ 6॥

गोपस्वामी गोकुलेन्द्रो, गोवर्धनवरप्रदः ।
नन्दादिगोकुलत्राता, दाता दारिद्र्यभञ्जनः ॥ 7॥

सर्वमङ्गलदाता च, सर्वकामप्रदायकः ।
आदिकर्ता महीभर्ता, सर्वसागरसिन्धुजः ॥ 8॥

गजगामी गजोद्धारी, कामी कामकलानिधिः ।
कलङ्करहितश्चन्द्रो, बिम्बास्यो बिम्बसत्तमः ॥ 9॥

मालाकारः(ख्) कृपाकारः(ख्), कोकिलास्वरभूषणः ।
रामो नीलाम्बरो देवो, हली दुर्दममर्दनः ॥ 10॥

सहस्राक्षपुरीभेत्ता, महामारीविनाशनः ।
शिवः(श्) शिवतमो भेत्ता, बलारातिप्रपूजकः ॥ 11॥

कुमारी वरदायी च, वरेण्यो मीनकेतनः ।
नरो नारायणो धीरो, राधापतिरुदारधीः ॥ 12॥

श्रीपतिः(श्) श्रीनिधिः(श्) श्रीमान्, मापतिः(फ्) प्रतिराजहा ।
वृन्दापतिः(ख्) कुलग्रामी, धामी ब्रह्म सनातनः ॥ 13॥

रेवतीरमणो रामश्- चञ्चलश्चारुलोचनः ।
रामायणशरीरोऽयं(म्), रामो रामः(श्) श्रियः(फ्)पतिः ॥ 14॥

शर्वरः(श्) शर्वरी शर्वः(स्), सर्वत्र शुभदायकः ।
राधाराधयितो राधी, राधाचित्तप्रमोदकः ॥ 15॥

राधारतिसुखोपेतो, राधामोहनतत्परः ।
राधावशीकरो राधा- हृदयाम्भोजषट्पदः ॥ 16॥

राधालिङ्गनसम्मोहो, राधानर्तनकौतुकः ।
राधासञ्जातसम्प्रीतो, राधाकामफलप्रदः ॥ 17॥

वृन्दापतिः(ख्) कोशनिधिः(ख्), कोकशोकविनाशकः ।
चन्द्रापतिश्चन्द्रपतिश्- चण्डकोदण्डभञ्जनः ॥ 18॥

रामो दाशरथी रामो, भृगुवं(म्)शसमुद्भवः ।
आत्मारामो जितक्रोधो, मोहो मोहान्धभञ्जनः ॥ 19॥

वृषभानुर्भवो भावः(ख्), काश्यपिः(ख्) करुणानिधिः ।
कोलाहलो हली हाली, हेली हलधरप्रियः ॥ 20॥

राधामुखाब्जमार्तण्डो, भास्करो रविजो विधुः ।
विधिर्विधाता वरुणो, वारुणो वारुणीप्रियः ॥ 21॥

रोहिणीहृदयानन्दी, वसुदेवात्मजो बली ।
नीलाम्बरो रौहिणेयो, जरासन्धवधोऽमलः ॥ 22 ॥

नागो नवाम्भो विरुदो, वीरहा वरदो बली ।
गोपथो विजयी विद्वान्, शिपिविष्टः(स्) सनातनः ॥ 23 ॥

पर्शुरामवचोग्राही, वरग्राही शृगालहा ।
दमघोषोपदेष्टा च, रथग्राही सुदर्शनः ॥ 24 ॥

वीरपत्नीयशस्त्राता, जराव्याधिविघातकः ।
द्वारकावासतत्त्वज्ञो, हुताशनवरप्रदः ॥ 25 ॥

यमुनावेगसं(म्)हारी, नीलाम्बरधरः(फ्) प्रभुः ।
विभुः(श्) शरासनो धन्वी, गणेशो गणनायकः ॥ 26 ॥

लक्ष्मणो लक्षणो लक्ष्यो, रक्षोवं(म्)शविनाशनः ।
वामनो वामनीभूतो- वमनो वमनारुहः ॥ 27 ॥

यशोदानन्दनः(ख्) कर्ता, यमलार्जुनमुक्तिदः ।
उलूखली महामानी, दामबद्धाह्वयी शमी ॥ 28 ॥

भक्तानुकारी भगवान्, केशवोऽचलधारकः ।
केशिहा मधुहा मोही, वृषासुरविघातकः ॥ 29 ॥

अघासुरविनाशी च, पूतनामोक्षदायकः ।
कुब्जाविनोदी भगवान्, कं(म्)समृत्युर्महामखी ॥ 30 ॥

अश्वमेधो वाजपेयो, गोमेधो नरमेधवान् ।
कन्दर्पकोटिलावण्यश्- चन्द्रकोटिसुशीतलः ॥ 31॥

रविकोटिप्रतीकाशो, वायुकोटिमहाबलः ।
ब्रह्मा ब्रह्माण्डकर्ता च, कमलावाञ्छितप्रदः ॥ 32॥

कमला कमलाक्षश्च, कमलामुखलोलुपः ।
कमलाव्रतधारी च, कमलाभः(फ्) पुरन्दरः ॥ 33॥

सौभाग्याधिकचित्तोऽयं(म्), महामायी महोत्कटः ।
तारकारिः(स्) सुरत्राता, मारीचक्षोभकारकः ॥ 34॥

विश्वामित्रप्रियो दान्तो, रामो राजीवलोचनः ।
लङ्काधिपकुलध्वं(म्)सी, विभीषणवरप्रदः ॥ 35॥

सीतानन्दकरो रामो, वीरो वारिधिबन्धनः ।
खरदूषणसं(म्)हारी, साकेतपुरवासनः॥ 36॥

चन्द्रावलीपतिः(ख्) कूलः(ख्), केशी कं(म्)सवधोऽमरः ।
माधवो मधुहा माध्वी, माध्वीको माधवो मधुः ॥ 37॥

मुञ्जाटवीगाहमनो, धेनुकारिर्धरात्मजः ।
वं(म्)शीवटविहारी च, गोवर्धनवनाश्रयः ॥ 38॥

तथा तालवनोद्देशी, भाण्डीरवनशङ्खहा ।
तृणावर्तकथाकारी, वृषभानुसुतापतिः ॥ 39॥

राधाप्राणसमो राधा- वदनाब्जमधुव्रतः ।
गोपीरञ्जनदैवज्ञो, लीलाकमलपूजितः ॥ 40॥

क्रीडाकमलसन्दोहो, गोपिकाप्रीतिरञ्जनः ।
रञ्जको रञ्जनो रङ्गो, रङ्गी रङ्गमहीरुहः ॥ 41॥

कामः(ख्) कामारिभक्तोऽयं(म्), पुराणपुरुषः(ख्) कविः ।
नारदो देवलो भीमो, बालो बालमुखाम्बुजः ॥ 42॥

अम्बुजो ब्रह्मसाक्षी च, योगी दत्तवरो मुनिः ।
ऋषभः(फ्) पर्वतो ग्रामो, नदीपवनवल्लभः ॥ 43॥

पद्मनाभः सुरज्येष्ठो, ब्रह्मा रुद्रोऽहिभूषितः ।
गणानां(न्) त्राणकर्ता च, गणेशो ग्रहिलो ग्रही ॥ 44॥

गणाश्रयो गणाध्यक्षः(ख्), क्रोडीकृतजगत्त्रयः ।
यादवेन्द्रो द्वारकेन्द्रो, मथुरावल्लभो धुरी ॥ 45॥

भ्रमरः(ख्) कुन्तली कुन्ती- सुतरक्षी महामखी ।
यमुनावरदाता च, काश्यपस्य वरप्रदः ॥ 46॥

शङ्खचूडवधोद्दामो, गोपीरक्षणतत्परः ।
पाञ्चजन्यकरो रामी, त्रिरामी वनजो जयः ॥ 47॥

फाल्गुनः(फ्) फाल्गुनसखो, विराधवधकारकः ।
रुक्मिणीप्राणनाथश्च, सत्यभामाप्रियङ्करः ॥ 48॥

कल्पवृक्षो महावृक्षो, दानवृक्षो महाफलः ।
अङ्कुशो भूसुरो भामो, भामको भ्रामको हरिः ॥ 49॥

सरलः(श्) शाश्वतो वीरो, यदुवं(म्)शी शिवात्मकः ।
प्रद्युम्नो बलकर्ता च, प्रहर्ता दैत्यहा प्रभुः ॥ 50॥

महाधनो महावीरो, वनमालाविभूषणः ।
तुलसीदामशोभाढ्यो, जालन्धरविनाशनः ॥ 51॥

शूरः(स्) सूर्यो मृकण्डश्च, भास्करो विश्वपूजितः ।
रविस्तमोहा वह्निश्च, वाडवो वडवानलः ॥ 52॥

दैत्यदर्पविनाशी च, गरुडो गरुडाग्रजः ।
गोपीनाथो महानाथो, वृन्दानाथोऽवरोधकः ॥ 53॥

प्रपञ्ची पञ्चरूपश्च, लतागुल्मश्च गोपतिः ।
गङ्गा च यमुनारूपो, गोदा वेत्रवती तथा ॥ 54॥

कावेरी नर्मदा तापी, गण्डकी सरयूस्तथा ।
राजसस्तामसः(स्) सत्त्वी, सर्वाङ्गी सर्वलोचनः ॥ 55॥

सुधामयोऽमृतमयो, योगिनीवल्लभः(श्) शिवः ।
बुद्धो बुद्धिमतां(म्) श्रेष्ठो, विष्णुर्जिष्णुः(श्) शचीपतिः ॥ 56॥

वं(म्)शी वं(म्)शधरो लोको, विलोको मोहनाशनः ।
रवरावो रवो रावो, बालो बालबलाहकः ॥ 57॥

**शिवो रुद्रो नलो नीलो, लाङ्गली लाङ्गलाश्रयः ।**
**पारदः(फ्) पावनो हं(म्)सो, हं(म्)सारूढो जगत्पतिः ॥ 58॥**

**मोहिनी मोहनो मायी, महामायो महामखी ।**
**वृषो वृषाकपिः(ख्) कालः(ख्), कालीदमनकारकः ॥ 59॥**

**कुब्जाभाग्यप्रदो वीरो, रजकक्षयकारकः ।**
**कोमलो वारुणो राजा, जलजो जलधारकः ॥ 60॥**

**हारकः(स्) सर्वपापघ्नः(फ्), परमेष्ठी पितामहः ।**
**खड्गधारी कृपाकारी, राधारमणसुन्दरः ॥ 61॥**

**द्वादशारण्यसम्भोगी, शेषनागफणालयः ।**
**कामः(श्) श्यामः(स्) सुखः(श्) श्रीदः(श्), श्रीपतिः(श्) श्रीनिधिः(ख्) कृतिः ॥ 62॥**

**हरिर्हरो नरो नारो, नरोत्तम इषुप्रियः ।**
**गोपालीचित्तहर्ता च, कर्त्ता सं(म्)सारतारकः ॥ 63॥**

**आदिदेवो महादेवो, गौरीगुरुरनाश्रयः ।**
**साधुर्मधुर्विधुर्धाता, भ्राता क्रूरपरायणः ॥ 64॥**

**रोलम्बी च हयग्रीवो, वानरारिर्वनाश्रयः ।**
**वनं(वँ) वनी वनाध्यक्षो, महावन्द्यो महामुनिः ॥ 65॥**

**स्यामन्तकमणिप्राज्ञो, विज्ञो विघ्नविघातकः ।**
**गोवर्धनो वर्धनीयो, वर्धनी वर्धनप्रियः ॥ 66॥**

**वर्धन्यो वर्धनो वर्धी, वार्धिन्यः सुमुखप्रियः ।**
**वर्धितो वृद्धको वृद्धो, वृन्दारकजनप्रियः ॥ 67॥**

**गोपालरमणीभर्ता, साम्बकुष्ठविनाशकः ।**
**रुक्मिणीहरणः(फ्) प्रेम, प्रेमी चन्द्रावलीपतिः ॥ 68॥**

**श्रीकर्ता विश्वभर्ता च, नरो नारायणो बली ।**
**गणो गणपतिश्चैव, दत्तात्रेयो महामुनिः ॥ 69॥**

**व्यासो नारायणो दिव्यो, भव्यो भावुकधारकः ।**
**स्वः(श्) श्रेयसं(म्) शिवं(म्) भद्रं(म्), भावुकं(म्) भाविकं(म्) शुभम् ॥ 70॥**

**शुभात्मकः(श्) शुभः(श्) शास्ता, प्रशास्ता मेघनादहा ।**
**ब्रह्मण्यदेवो दीनाना- मुद्धारकरणक्षमः ॥ 71॥**

**कृष्णः(ख्) कमलपत्राक्षः(ख्), कृष्णः(ख्) कमललोचनः ।**
**कृष्णः(ख्) कामी सदाकृष्णः(स्), समस्तप्रियकारकः ॥ 72॥**

**नन्दो नन्दी महानन्दी, मादी मादनकः(ख्)किली ।**
**मिली हिली गिली गोली, गोलो गोलालयो गुली ॥ 73॥**

**गुग्गुली मारकी शाखी, वटः(फ्) पिप्पलकः(ख्) कृती ।**
**म्लेच्छहा कालहर्ता च, यशोदायश एव च ॥ 74॥**

**अच्युतः(ख्) केशवो विष्णुर् - हरिः(स्) सत्यो जनार्दनः ।**
**हं(म्)सो नारायणो लीलो, नीलो भक्तिपरायणः ॥ 75॥**

**जानकीवल्लभो रामो, विरामो विघ्ननाशनः ।**
**सहस्रां(म्)शुर्महाभानुर् - वीरबाहुर्महोदधिः ॥ 76॥**

**समुद्रोऽब्धिरकूपारः(फ्), पारावारः(स्) सरित्पतिः ।**
**गोकुलानन्दकारी च, प्रतिज्ञापरिपालकः ॥ 77॥**

**सदारामः(ख्) कृपारामो, महारामो धनुर्धरः ।**
**पर्वतः(फ्) पर्वताकारो, गयो गेयो द्विजप्रियः ॥ 78॥**

**कम्बलाश्वतरो रामो, रामायणप्रवर्तकः ।**
**द्यौर्दिवो दिवसो दिव्यो, भव्यो भाविभयापहः ॥ 79॥**

**पार्वतीभाग्यसहितो, भ्राता लक्ष्मीविलासवान् ।**
**विलासी साहसी सर्वी, गर्वी गर्वितलोचनः ॥ 80॥**

**मुरारिर्लोकधर्मज्ञो, जीवनो जीवनान्तकः ।**
**यमो यमादिर्यमनो, यामी यामविधायकः ॥ 81॥**

**वं(म्)सुली पां(म्)सुली पां(म्)सुः(फ्), पाण्डुरर्जुनवल्लभः ।**
**ललिताचन्द्रिकामाली, माली मालाम्बुजाश्रयः ॥ 82॥**

**अम्बुजाक्षो महायक्षो, दक्षश्चिन्तामणिः(फ्) प्रभुः ।**
**मणिर्दिनमणिश्चैव, केदारो बदराश्रयः ॥ 83॥**

**बदरीवनसम्प्रीतो, व्यासः(स्) सत्यवतीसुतः ।**
**अमरारिनिहन्ता च, सुधासिन्धुर्विधूदयः ॥ 84॥**

चन्द्रो रविः(श्) शिवः(श्) शूली, चक्री चैव गदाधरः ।
श्रीकर्ता श्रीपतिः(श्) श्रीदः(श्), श्रीदेवो देवकीसुतः ॥ 85॥

श्रीपतिः(फ्) पुण्डरीकाक्षः(फ्), पद्मनाभो जगत्पतिः ।
वासुदेवोऽप्रमेयात्मा, केशवो गरुडध्वजः ॥ 86॥

नारायणः(फ्) परं(न्) धाम, देवदेवो महेश्वरः ।
चक्रपाणिः(ख्) कलापूर्णो, वेदवेद्यो दयानिधिः ॥ 87॥

भगवान्सर्वभूतेशो, गोपालः(स्) सर्वपालकः ।
अनन्तो निर्गुणोऽनन्तो, निर्विकल्पो निरञ्जनः ॥ 88॥

निराधारो निराकारो, निराभासो निराश्रयः ।
पुरुषः(फ्) प्रणवातीतो, मुकुन्दः(फ्) परमेश्वरः ॥ 89॥

क्षणावनिः(स्) सार्वभौमो, वैकुण्ठो भक्तवत्सलः ।
विष्णुर्दामोदरः(ख्) कृष्णो, माधवो मथुरापतिः ॥ 90॥

देवकीगर्भसम्भूतो, यशोदावत्सलो हरिः ।
शिवः(स्) सङ्कर्षणः(श्) शम्भुर् -भूतनाथो दिवस्पतिः ॥ 91॥

अव्ययः(स्) सर्वधर्मज्ञो, निर्मलो निरुपद्रवः ।
निर्वाणनायको नित्यो, नीलजीमूतसन्निभः ॥ 92॥

कलाक्षयश्च सर्वज्ञः(ख्), कमलारूपतत्परः ।
हृषीकेशः(फ्) पीतवासो, वसुदेवप्रियात्मजः ॥ 93॥

नन्दगोपकुमारार्यो, नवनीताशनः(फ्) प्रभुः ।
पुराणपुरुषः(श्) श्रेष्ठः(श्), शङ्खपाणिः(स्) सुविक्रमः ॥ 94॥

अनिरुद्धश्चक्ररथः(श्), शार्ङ्गपाणिश्चतुर्भुजः ।
गदाधरः(स्) सुरार्तिघ्नो, गोविन्दो नन्दकायुधः ॥ 95॥

वृन्दावनचरः(श्) शौरिर्- वेणुवाद्यविशारदः ।
तृणावर्तान्तको भीमो, साहसो बहुविक्रमः ॥ 96॥

शकटासुरसं(म्)हारी, बकासुरविनाशनः ।
धेनुकासुरसं(ङ्)घातः(फ्), पूतनारिर्नृकेसरी ॥ 97॥

पितामहो गुरुः(स्) साक्षी, प्रत्यगात्मा सदाशिवः ।
अप्रमेयः(फ्) प्रभुः(फ्) प्राज्ञोऽ- प्रतर्क्यः(स्) स्वप्नवर्धनः ॥ 98॥

धन्यो मान्यो भवो भावो, धीरः(श्) शान्तो जगद्गुरुः ।
अन्तर्यामीश्वरो दिव्यो, दैवज्ञो देवतागुरुः ॥ 99॥

क्षीराब्धिशयनो धाता, लक्ष्मीवाँल्लक्ष्मणाग्रजः ।
धात्रीपतिरमेयात्मा चन्द्रशेखरपूजितः ॥ 100॥

लोकसाक्षी जगच्चक्षुः(फ्), पुण्यचारित्रकीर्तनः ।
कोटिमन्मथसौन्दर्यो, जगन्मोहनविग्रहः ॥ 101॥

मन्दस्मिततमो गोपो, गोपिकापरिवेष्टितः ।
फुल्लारविन्दनयनश्- चाणूरान्ध्रनिषूदनः ॥ 102॥

इन्दीवरदलश्यामो, बर्हिबर्हावतंसकः ।
मुरलीनिनदाह्लादो, दिव्यमाल्याम्बराश्रयः ॥ 103॥

सुकपोलयुगः(स्) सुभ्रू- युगलः(स्) सुललाटकः ।
कम्बुग्रीवो विशालाक्षो, लक्ष्मीवान् शुभलक्षणः ॥ 104॥

पीनवक्षाश्चतुर्बाहुश्- चतुर्मूर्तिस्त्रिविक्रमः ।
कलङ्करहितः(श्) शुद्धो, दुष्टशत्रुनिबर्हणः ॥ 105॥

किरीटकुण्डलधरः(ख्), कटकाङ्गदमण्डितः ।
मुद्रिकाभरणोपेतः(ख्), कटिसूत्रविराजितः ॥ 106॥

मञ्जीररञ्जितपदः(स्), सर्वाभरणभूषितः ।
विन्यस्तपादयुगलो, दिव्यमङ्गलविग्रहः ॥ 107॥

गोपिकानयनानन्दः(फ्), पूर्णचन्द्रनिभाननः ।
समस्तजगदानन्दः(स्), सुन्दरो लोकनन्दनः ॥ 108॥

यमुनातीरसञ्चारी, राधामन्मथवैभवः ।
गोपनारीप्रियो दान्तो, गोपीवस्त्रापहारकः ॥ 109॥

शृङ्गारमूर्तिः(श्) श्रीधामा, तारको मूलकारणम् ।
सृष्टिसं(म्)रक्षणोपायः(ख्) क्रूरासुरविभञ्जनः ॥ 110॥

नरकासुरहारी च, मुरारिर्वैरिमर्दनः ।
आदितेयप्रियो दैत्य - भीकरश्चेन्दुशेखरः ॥ 111॥

**जरासन्धकुलध्वं(म्)सी, कं(म्)सारातिः(स्) सुविक्रमः ।**
**पुण्यश्लोकः(ख्) कीर्तनीयो, यादवेन्द्रो जगन्नुतः ॥ 112॥**

**रुक्मिणीरमणः(स्) सत्य- भामाजाम्बवतीप्रियः ।**
**मित्रविन्दानाग्नजिती- लक्ष्मणासमुपासितः ॥ 113॥**

**सुधाकरकुले जातोऽ- नन्तप्रबलविक्रमः ।**
**सर्वसौभाग्यसम्पन्नो, द्वारकायामुपस्थितः ॥ 114॥**

**भद्रासूर्यसुतानाथो, लीलामानुषविग्रहः ।**
**सहस्रषोडशस्त्रीशो, भोगमोक्षैकदायकः ॥ 115॥**

**वेदान्तवेद्यः(स्) सं(वँ)वेद्यो, वैद्यो ब्रह्माण्डनायकः ।**
**गोवर्धनधरो नाथः(स्), सर्वजीवदयापरः ॥ 116॥**

**मूर्तिमान्सर्वभूतात्मा, आर्तत्राणपरायणः ।**
**सर्वज्ञः(स्) सर्वसुलभः(स्), सर्वशास्त्रविशारदः ॥ 117॥**

**षड्गुणैश्वर्यसम्पन्नः(फ्), पूर्णकामो धुरन्धरः ।**
**महानुभावः(ख्) कैवल्य- दायको लोकनायकः ॥ 118॥**

**आदिमध्यान्तरहितः(श्), शुद्धसात्त्विकविग्रहः ।**
**असमानः(स्) समस्तात्मा, शरणागतवत्सलः ॥ 119॥**

**उत्पत्तिस्थितिसं(म्)हार- कारणं(म्) सर्वकारणम् ।**
**गम्भीरः(स्) सर्वभावज्ञः(स्), सच्चिदानन्दविग्रहः ॥ 120॥**

विष्वक्सेनः(स्) सत्यसन्धः(स्), सत्यवान् सत्यविक्रमः ।
सत्यव्रतः(स्) सत्यसं(ञ्)ज्ञः(स्), सर्वधर्मपरायणः ॥ 121॥

आपन्नार्तिप्रशमनो, द्रौपदीमानरक्षकः ।
कन्दर्पजनकः(फ्) प्राज्ञो, जगन्नाटकवैभवः ॥ 122॥

भक्तिवश्यो गुणातीतः(स्), सर्वैश्वर्यप्रदायकः ।
दमघोषसुतद्वेषी, बाणबाहुविखण्डनः ॥ 123॥

भीष्मभक्तिप्रदो दिव्यः(ख्), कौरवान्वयनाशनः ।
कौन्तेयप्रियबन्धुश्च, पार्थस्यन्दनसारथिः ॥ 124॥

नारसिं(म्)हो महावीरः(स्), स्तम्भजातो महाबलः ।
प्रह्लादवरदः(स्) सत्यो, देवपूज्योऽभयङ्करः ॥ 125॥

उपेन्द्रइन्द्रावरजो, वामनो बलिबन्धनः ।
गजेन्द्रवरदः(स्) स्वामी, सर्वदेवनमस्कृतः ॥ 126॥

शेषपर्यङ्कशयनो, वैनतेयरथो जयी ।
अव्याहतबलैश्वर्य- सम्पन्नः(फ्) पूर्णमानसः ॥ 127॥

योगेश्वरेश्वरः(स्) साक्षी, क्षेत्रज्ञो ज्ञानदायकः ।
योगिहृत्पङ्कजावासो, योगमायासमन्वितः ॥ 128॥

नादबिन्दुकलातीतश्- चतुर्वर्गफलप्रदः ।
सुषुम्णामार्गसञ्चारी, देहस्यान्तरसं(म्)स्थितः ॥ 129॥

देहेन्द्रियमनः(फ्) प्राण- साक्षी चेतः(फ्)प्रसादकः ।
सूक्ष्मः(स्) सर्वगतो देही, ज्ञानदर्पणगोचरः ॥ 130॥

तत्त्वत्रयात्मकोऽव्यक्तः(ख्), कुण्डलीसमुपाश्रितः ।
ब्रह्मण्यः(स्) सर्वधर्मज्ञः(श्), शान्तो दान्तो गतक्लमः ॥ 131॥

श्रीनिवासः(स्) सदानन्दो, विश्वमूर्तिर्महाप्रभुः ।
सहस्रशीर्षा पुरुषः(स्), सहस्राक्षः(स्) सहस्रपात् ॥ 132॥

समस्तभुवनाधारः(स्), समस्तप्राणरक्षकः ।
समस्तसर्वभावज्ञो, गोपिकाप्राणवल्लभः ॥ 133॥

नित्योत्सवो नित्यसौख्यो, नित्यश्रीर्नित्यमङ्गलः ।
व्यूहार्चितो जगन्नाथः(श्), श्रीवैकुण्ठपुराधिपः ॥ 134॥

पूर्णानन्दघनीभूतो, गोपवेषधरो हरिः ।
कलापकुसुमश्यामः(ख्), कोमलः(श्) शान्तविग्रहः ॥ 135॥

गोपाङ्गनावृतोऽनन्तो, वृन्दावनसमाश्रयः ।
वेणुवादरतः(श्) श्रेष्ठो, देवानां(म्) हितकारकः ॥ 136॥

बालक्रीडासमासक्तो, नवनीतस्य तस्करः ।
गोपालकामिनीजारश्- चोरजारशिखामणिः ॥ 137॥

परं(ञ्) ज्योतिः(फ्) पराकाशः(फ्),परावासः(फ्) परिस्फुटः ।
अष्टादशाक्षरो मन्त्रो, व्यापको लोकपावनः ॥ 138॥

सप्तकोटिमहामन्त्र- शेखरो देवशेखरः ।
विज्ञानज्ञानसन्धानस् - तेजोराशिर्जगत्पतिः ॥ 139॥

भक्तलोकप्रसन्नात्मा, भक्तमन्दारविग्रहः ।
भक्तदारिद्र्यदमनो, भक्तानां(म्) प्रीतिदायकः ॥ 140॥

भक्ताधीनमनाः(फ्) पूज्यो, भक्तलोकशिवङ्करः ।
भक्ताभीष्टप्रदः(स्), सर्व - भक्ताघौघनिकृन्तनः ॥ 141॥

अपारकरुणासिन्धुर्- भगवान्भक्ततत्परः ॥ 142॥

॥ इति श्रीसम्मोहनतन्त्रे पार्वतीश्वरसं(वँ)वादे श्रीगोपालडसहस्रनामस्तोत्रम् सम्पूर्णम् ॥

अथ माहात्म्यम्

इति श्रीराधिकानाथ- सहस्रं(न्) नामकीर्तनम्।
स्मरणात्पापराशीनां(ङ्), खण्डनं(म्) मृत्युनाशनम् ॥ 1 ॥

वैष्णवानां(म्) प्रियकरं(म्), महारोगनिवारणम् ।
ब्रह्महत्या सुरापानं(म्), परस्त्रीगमनं(न्) तथा ॥ 2 ॥

परद्रव्यापहरणं(म्), परद्वेषसमन्वितम् ।
मानसं(वँ) वाचिकं(ङ्) कायं(यँ), यत्पापं(म्) पापसम्भवम् ॥ 3 ॥

सहस्रनामपठनात्, सर्वं(न्) नश्यति तत्क्षणात् ।
महादारिद्र्ययुक्तो यो, वैष्णवो विष्णुभक्तिमान् ॥ 4 ॥

कार्तिक्यां(म्) सम्पठेद्रात्रौ, शतमष्टोत्तरं(ङ्) क्रमात् ।

पीताम्बरधरो धीमान्- सुगन्धैः(फ्)पुष्पचन्दनैः ॥ 5 ॥

पुस्तकं(म्) पूजयित्वा तु, नैवेद्यादिभिरेव च ।
राधाध्यानाङ्कितो धीरो, वनमालाविभूषितः ॥ 6 ॥

शतमष्टोत्तरं(न्) देवि, पठेन्नामसहस्रकम्।
तुलसीमालया युक्तो, वैष्णवो भक्तितत्परः॥ 7 ॥

रविवारे च शुक्रे च, द्वादश्यां(म्) श्राद्धवासरे ।
ब्राह्मणं(म्) पूजयित्वा च, भोजयित्वा विधानतः ॥ 8॥

यः(फ्) पठेद्वैष्णवो नित्यं(म्), स याति हरिमन्दिरम् ।
कृष्णेनोक्तं(म्) राधिकायै, मयि प्रोक्तं(म्) पुरा शिवे ॥ 9 ॥

नारदाय मया प्रोक्तं(न्), नारदेन प्रकाशितम् ।
मया त्वयि वरारोहे, प्रोक्तमेतत्सुदुर्लभम् ॥10॥

गोपनीयं(म्) प्रयत्नेन, न प्रकाश्यं(ङ्) कथं(ञ्)चन ।
शठाय पापिने चैव, लम्पटाय विशेषतः ॥ 11॥

न दातव्यं(न्) न दातव्यं(न्), न दातव्यं(ङ्) कदाचन ।
देयं(म्) शिष्याय शान्ताय, विष्णुभक्तिरताय च ॥ 12॥

गोदानब्रह्मयज्ञादेर्- वाजपेयशतस्य च ।
अश्वमेधसहस्रस्य, फलं(म्) पाठे भवेद् ध्रुवम्॥ 13॥

एकादश्यां(न्) नरः(स्) स्नात्वा, सुगन्धिद्रव्यतैलकैः ।
आहारं(म्) ब्राह्मणे दत्त्वा, दक्षिणां(म्) स्वर्णभूषणम् ॥ 14॥

तत आरम्भकर्ताऽस्मात्, सर्वं(म्) प्राप्नोति मानवः ।
शतावृत्तं(म्) सहस्रं(ञ्) च, यः(फ्) पठेद्वैष्णवो जनः ॥ 15॥

श्रीवृन्दावनचन्द्रस्य, प्रसादात्सर्वमाप्नुयात् ।
यद्गृहे पुस्तकं(न्) देवि, पूजितं(ञ्) चैव तिष्ठति ॥ 16॥

न मारी न च दुर्भिक्षं(न्), नोपसर्गभयं(ङ्) क्वचित् ।
सर्पादिभूतयक्षाद्या, नश्यन्ति नात्र सं(म्)शयः ॥ 17॥

श्रीगोपालो महादेवि, वसेत्तस्य गृहे सदा ।
गृहे यत्र सहस्रं(ञ्) च, नाम्नां(न्) तिष्ठति पूजितम् ॥ 18॥

॥ इति श्रीसम्मोहनतन्त्रे पार्वतीश्वरसं(वँ)वादे
श्रीगोपालसहस्रनामस्तोत्रस्य माहात्म्यं(म्) सम्पूर्णम् ॥